# .. Adhyatmaramayanamahatmyam ..

# ॥ અધ્યાત્મરામાયણમાહાત્મ્યમ્ બ્રહ્માણ્ડપુરાણે ॥

## Document Information

Text title : adhyAtmarAmAyaNamAhAtmyam brahmANDapurANe
File name : adhyAtmarAmAyaNamAhAtmyam.itx
Category : adhyAtmarAmAyaNa
Location : doc_raama
Author : Shri Veda Vyas
Language : Sanskrit
Subject : philosophy/hinduism/religion
Transliterated by : PSA Easwaran psaeaswaran at gmail.com
Proofread by : PSA Easwaran psaeaswaran at gmail.com
Description-comments : shrIbrahmANDapurANe uttarakhaNDe
Latest update : June 8, 2013
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ અધ્યાત્મરામાયણમાહાત્મ્યમ્ બ્રહ્માણ્ડપુરાણે ॥

રામં વિશ્વમયં વન્દે રામં વન્દે રઘૂદ્વહમ્ ।
રામં વિપ્રવરં વન્દે રામં શ્યામાગ્રજં ભજે ॥
યસ્ય વાગંશુતશ્ચ્યુતં રમ્યં રામાયણામૃતમ્ ।
શૈલજાસેવિતં વન્દે તં શિવં સોમરૂપિણમ્ ॥
સચ્ચિદાનન્દસન્દોહં ભક્તિભૂતિવિભૂષણમ્ ।
પૂર્ણાનન્દમહં વન્દે સદ્ગુરું શઙ્કરં સ્વયમ્ ॥
અજ્ઞાનધ્વાન્તસંહર્ત્રી જ્ઞાનલોકવિલાસિની ।
ચન્દ્રચૂડવચશ્ચન્દ્રચન્દ્રિકેયં વિરાજતે ॥

અપ્રમેયત્રયાતીતનિર્મલજ્ઞાનમૂર્તયે ।
મનોગિરાં વિદૂરાય દક્ષિણામૂર્તયે નમઃ ॥ ૧॥

સૂત ઉવાચ ।
કદાચિન્નારદો યોગી પરાનુગ્રહવાઞ્છયા ।
પર્યટન્ સકલાન્ લોકાન્ સત્યલોકમુપાગમત્ ॥ ૨॥

તત્ર દૃષ્ટ્વા મૂર્તિમદ્ભિશ્છન્દોભિઃ પરિવેષ્ટિતમ્।
બાલાર્કપ્રભયા સમ્યગ્ભાસયન્તં સભાગૃહમ્ ॥ ૩ ॥

માર્કણ્ડેયાદિમુનિભિઃ સ્તૂયમાનં મુહુર્મુહુઃ ।
સર્વાર્થગોચરજ્ઞાનં સરસ્વત્યા સમન્વિતમ્ ॥ ૪॥

ચતુર્મુખં જગન્નાથં ભક્તાભીષ્ટફલપ્રદમ્ ।
પ્રણમ્ય દણ્ડવદ્ભક્ત્યા તુષ્ટાવ મુનિપુઙ્ગવઃ ॥ ૫॥

સન્તુષ્ટસ્તં મુનિં પ્રાહ સ્વયમ્ભૂર્વૈષ્ણવોત્તમમ્ ।
કિં પ્રષ્ટુકામસ્ત્વમસિ તદ્વદિષ્યામિ તે મુને ॥ ૬॥

ઇત્યાકર્ણ્ય વચસ્તસ્ય મુનિર્બ્રહ્માણમબ્રવીત્ ।
ત્વત્તઃ શ્રુતં મયા સર્વં પૂર્વમેવ શુભાશુભમ્ ॥ ૭॥

ઇદાનીમેકમેવાસ્તિ શ્રોતવ્યં સુરસત્તમ ।
તદ્રહસ્યમપિ બ્રૂહિ યદિ તેઽનુગ્રહો મયિ ॥ ૮॥

પ્રાપ્તે કલિયુગે ઘોરે નરાઃ પુણ્યવિવર્જિતાઃ ।
દુરાચારરતાઃ સર્વે સત્યવાર્તાપરાઙ્મુખાઃ ॥ ૯॥

પરાપવાદનિરતાઃ પરદ્રવ્યાભિલાષિણઃ ।
પરસ્ત્રીસક્તમનસઃ પરહિંસાપરાયણાઃ ॥ ૧૦॥

દેહાત્મદૃષ્ટયો મૂઢા નાસ્તિકા પશુબુદ્ધયઃ ।
માતાપિતૃકૃતદ્વેષાઃ સ્ત્રીદેવાઃ કામકિઙ્કરાઃ ॥ ૧૧॥

વિપ્રા લોભગ્રહગ્રસ્તા વેદવિક્રયજીવિનઃ ।
ધનાર્જનાર્થમભ્યસ્તવિદ્યા મદવિમોહિતાઃ ॥ ૧૨॥

ત્યક્તસ્વજાતિકર્માણઃ પ્રાયશઃ પરવઞ્ચકાઃ।
ક્ષત્રિયાશ્ચ તથા વૈશ્યાઃ સ્વધર્મત્યાગશીલિનઃ ॥ ૧૩॥

તદ્વચ્છૂદ્રાશ્ચ યે કેચિદ્બ્રાહ્મણાચારતત્પરાઃ।
સ્ત્રિયશ્ચ પ્રાયશો ભ્રષ્ટા ભર્ત્રવજ્ઞાનનિર્ભયાઃ ॥ ૧૪॥

શ્વશુરદ્રોહકારિણ્યો ભવિષ્યન્તિ ન સંશયઃ।
એતેષાં નષ્ટબુદ્ધીનાં પરલોકઃ કથં ભવેત્ ॥ ૧૫॥

ઇતિ ચિન્તાકુલં ચિત્તં જાયતે મમ સન્તતમ્ ।
લઘૂપાયેન યેનૈષાં પરલોકગતિર્ભવેત્।
તમુપાયમુપાખ્યાહિ સર્વં વેત્તિ યતો ભવાન્ ॥ ૧૬॥

ઇત્યૃષેર્વાક્યમાકર્ણ્ય પ્રત્યુવાચામ્બુજાસનઃ ।
સાધુ પૃષ્ટં ત્વયા સાધો વક્ષ્યે તચ્છૃણુ સાદરમ્ ॥ ૧૭॥

પુરા ત્રિપુરહન્તારં પાર્વતી ભક્તવત્સલા।
શ્રીરામતત્ત્વં જિજ્ઞાસુઃ પપ્રચ્છ વિનયાન્વિતા ॥ ૧૮॥

પ્રિયાયૈ ગિરિશસ્તસ્યૈ ગૂઢં વ્યાખ્યાતવાન્ સ્વયમ્।
પુરાણોત્તમમધ્યાત્મરામાયણમિતિ સ્મૃતમ્ ॥ ૧૯॥

તત્પાર્વતી જગદ્ધાત્રી પૂજયિત્વા દિવાનિશમ્।
આલોચયન્તી સ્વાનન્દમગ્ના તિષ્ઠતિ સામ્પ્રતમ્ ॥ ૨૦॥

પ્રચરિષ્યતિ તલ્લોકે પ્રાણ્યદૃષ્ટવશાદ્યદા ।
તસ્યાધ્યયનમાત્રેણ જના યાસ્યન્તિ સદ્ગતિમ્ ॥ ૨૧॥

તાવદ્વિજૃમ્ભતે પાપં બ્રહ્મહત્યાપુરઃસરમ્।
યાવજ્જગતિ નાધ્યાત્મરામાયણમુદેષ્યતિ ॥ ૨૨॥

તાવત્કલિમહોત્સાહો નિઃશઙ્કં સમ્પ્રવર્તતે।
યાવજ્જગતિ નાધ્યાત્મરામાયણમુદેષ્યતિ ॥ ૨૩॥

તાવદ્યમભટાઃ શૂરાઃ સઞ્ચરિષ્યન્તિ નિર્ભયાઃ।
યાવજ્જગતિ નાધ્યાત્મરામાયણમુદેષ્યતિ ॥ ૨૪॥

તાવત્સર્વાણિ શાસ્ત્રાણિ વિવદન્તે પરસ્પરમ્ ॥ ૨૫॥

તાવત્સ્વરૂપં રામસ્ય દુર્બોધં મહતામપિ ।
યાવજ્જગતિ નાધ્યાત્મરામાયણમુદેષ્યતિ ॥ ૨૬॥

અધ્યાત્મરામાયણસઙ્કીર્તનશ્રવણાદિજમ્ ।
ફલં વક્તું ન શક્નોમિ કાર્ત્સ્ન્યેન મુનિસત્તમ ॥ ૨૭॥

તથાપિ તસ્ય માહાત્મ્યં વક્ષ્યે કિઞ્ચિત્તવાનઘ।
શૃણુ ચિત્તં સમાધાય શિવેનોક્તં પુરા મમ ॥ ૨૮॥

અધ્યાત્મરામાયણતઃ શ્લોકં શ્લોકાર્ધમેવ વા।
યઃ પઠેત્ ભક્તિસંયુક્તઃ સ પાપાન્મુચ્યતે ક્ષણાત્ ॥ ૨૯॥

યસ્તુ પ્રત્યહમધ્યાત્મરામાયણમનન્યધીઃ।
યથાશક્તિ વદેદ્ભક્ત્યા સ જીવન્મુક્ત ઉચ્યતે ॥ ૩૦॥

યો ભક્ત્યાર્ચયતેઽધ્યાત્મરામાયણમતન્દ્રિતઃ।
દિને દિનેઽશ્વમેધસ્ય ફલં તસ્ય ભવેન્મુને ॥ ૩૧॥

યદૃચ્છયાપિ યોઽધ્યાત્મરામાયણમનાદરાત્।
અન્યતઃ શૃણુયાન્મર્ત્યઃ સોઽપિ મુચ્યેત પાતકાત્ ॥ ૩૨॥

નમસ્કરોતિ યોઽધ્યાત્મરામાયણમદૂરતઃ।
સર્વદેવાર્ચનફલં સ પ્રાપ્નોતિ ન સંશયઃ ॥ ૩૩॥

લિખિત્વા પુસ્તકેઽધ્યાત્મરામાયણમશેષતઃ।
યો દદ્યાદ્રામભક્તેભ્યસ્તસ્ય પુણ્યફલં શૃણુ ॥ ૩૪॥

અધીતેષુ ચ વેદેષુ શાસ્ત્રેષુ વ્યાકૃતેષુ ચ ।
યત્ફલં દુર્લભં લોકે તત્ફલં તસ્ય સમ્ભવેત્ ॥ ૩૫॥

એકાદશીદિનેઽધ્યાત્મરામાયણમુપોષિતઃ ।
યો રામભક્તઃ સદસિ વ્યાકરોતિ નરોત્તમઃ ॥ ૩૬॥

તસ્ય પુણ્યફલં વક્ષ્યે શૃણુ વૈષ્ણવસત્તમ ।
પ્રત્યક્ષરં તુ ગાયત્રીપુરશ્ચર્યાફલં ભવેત્ ॥ ૩૭॥

ઉપવાસવ્રતં કૃત્વા શ્રીરામનવમીદિને ।
રાત્રૌ જાગરિતોઽધ્યાત્મરામાયણમનન્યધીઃ।
યઃ પઠેચ્છૃણુયાદ્વાપિ તસ્ય પુણ્યં વદામ્યહમ્ ॥ ૩૮॥

કુરુક્ષેત્રાદિનિખિલપુણ્યતીર્થેષ્વનેકશઃ।
આત્મતુલ્યં ધનં સૂર્યગ્રહણે સર્વતોમુખે ॥ ૩૯॥

વિપ્રેભ્યો વ્યાસતુલ્યેભ્યો દત્વા યત્ફલમશ્નુતે।
તત્ફલં સમ્ભવેત્તસ્ય સત્યં સત્યં ન સંશયઃ ॥ ૪૦॥

યો ગાયતે મુદાऽધ્યાત્મરામાયણમહર્નિશમ્।
આજ્ઞાં તસ્ય પ્રતીક્ષન્તે દેવા ઇન્દ્રપુરોગમાઃ ॥ ૪૧॥

પઠન્ પ્રત્યહમધ્યાત્મરામાયણમનુવ્રતઃ।
યદ્યત્કરોતિ તત્કર્મ તતઃ કોટિગુણં ભવેત્ ॥ ૪૨॥

તત્ર શ્રીરામહૃદયં યઃ પઠેત્ સુસમાહિતઃ ।
સ બ્રહ્મઘ્નોऽપિ પૂતાત્મા ત્રિભિરેવ દિનૈર્ભવેત્ ॥ ૪૩ ॥

શ્રીરામહૃદયં યસ્તુ હનૂમત્પ્રતિમાન્તિકે।
ત્રિઃ પઠેત્ પ્રત્યહં મૌની સ સર્વેપ્સિતભાગ્ભવેત્ ॥ ૪૪॥

પઠન્ શ્રીરામહૃદયં તુલસ્યશ્વત્થયોર્યદિ।
પ્રત્યક્ષરં પ્રકુર્વીત બ્રહ્મહત્યાનિવર્તનમ્ ॥ ૪૫॥

શ્રીરામગીતામાહાત્મ્યં કૃત્સ્નં જાનાતિ શઙ્કરઃ।
તદર્ધં ગિરિજા વેત્તિ તદર્ધં વેદ્મ્યહં મુને ॥ ૪૬॥

તત્તે કિઞ્ચિત્પ્રવક્ષ્યામિ કૃત્સ્નં વક્તું ન શક્યતે ।
યજ્જ્ઞાત્વા તત્ક્ષણાલ્લોકશ્ચિત્તશુદ્ધિમવાપ્નુયાત્ ॥ ૪૭॥

શ્રીરામગીતા યત્પાપં ન નાશયતિ નારદ।
તન્ન નશ્યતિ તીર્થાદૌ લોકે ક્વાપિ કદાચન।
તન્ન પશ્યામ્યહં લોકે માર્ગમાણોऽપિ સર્વદા ॥ ૪૮॥

રામેણોપનિષત્સિન્ધુમુન્મથ્યોત્પાદિતં મુદા।
લક્ષ્મણાયાર્પિતાં ગીતાસુધાં પીત્વાऽમરો ભવેત્ ॥ ૪૯॥

જમદગ્નિસુતઃ પુર્વં કાર્તવીર્યવધેચ્છયા।
ધનુર્વિદ્યામભ્યસિતું મહેશસ્યાન્તિકે વસન્ ॥ ૫૦॥

અધીયમાનાં પાર્વત્યા રામગીતાં પ્રયત્નતઃ ।
શ્રૂત્વા ગૃહીત્વાऽऽશુ પઠન્નારાયણકલામગાત્ ॥ ૫૧॥

બ્રહ્મહત્યાદિપાપાનાં નિષ્કૃતિં યદિ વાઞ્છતિ।
રામગીતાં માસમાત્રં પઠિત્વા મુચ્યતે નરઃ ॥ ૫૨॥

દુષ્પ્;રતિગ્રહદુર્ભોજ્યદુરાલાપાદિસમ્ભવમ્।
પાપં યત્તત્કીર્તનેન રામગીતા વિનાશયેત્ ॥ ૫૩ ॥

શાલગ્રામશિલાગ્રે ચ તુલસ્યશ્વત્થસન્નિધૌ।
યતીનાં પુરતસ્તદ્વત્ રામગીતાં પઠેત્તુ યઃ ॥ ૫૪॥

સ તત્ફલમવાપ્નોતિ યદ્વાચોઽપિ ન ગોચરમ્ ॥ ૫૫॥

રામગીતાં પઠન્ ભક્ત્યા યઃ શ્રાદ્ધે ભોજયેદ્દ્વિજાન્।
તસ્ય તે પિતરઃ સર્વે યાન્તિ વિષ્ણોઃ પરં પદમ્ ॥ ૫૬॥

એકાદશ્યાં નિરાહારો નિયતો દ્વાદશીદિને।
સ્થિત્વાગસ્ત્યતરોર્મૂલે રામગીતાં પઠેત્તુ યઃ।
સ એવ રાઘવઃ સાક્ષાત્ સર્વદેવૈશ્ચ પૂજ્યતે ॥ ૫૭॥

વિના દાનાં વિના ધ્યાનં વિના તીર્થાવગાહનમ્ ।
બહુના કિમિહોક્તેન શૃણુ નારદ તત્ત્વતઃ।
રામગીતાં નરોઽધીત્ય તદનન્તફલં લભેત્ ॥ ૫૮॥

શ્રુતિસ્મૃતિપુરાણેતિહાસાગમશતાનિ ચ।
અર્હન્તિ નાલ્પમધ્યાત્મરામાયણકલામપિ ॥ ૫૯॥

અધ્યાત્મરામચરિતસ્ય મુનીશ્વરાય
    માહાત્મ્યમેતદુદિતં કમલાસનેન ।
યઃ શ્રદ્ધયા પઠતિ વા શૃણુયાત્ સ મર્ત્યઃ
    પ્રાપ્નોતિ વિષ્ણુપદવીં સુરપૂજ્યમાનઃ ॥ ૬૦॥

ઇતિ શ્રીબ્રહ્માણ્ડપુરાણે ઉત્તરખણ્ડે અધ્યાત્મરામાયણમાહાત્મ્યં સમ્પૂર્ણમ્ ॥

Proofread by PSA Easwaran psaeaswaran at gmail.com

.. Adhyatmaramayanamahatmyam ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*